SKRIT UNIVERSITY
1904
M9

Sree Chamarajendra Sanskrit College

FORT, BANGALORE CITY.

LIBRARY RULES.

I. Any one who shall lose, deface by writing or otherwise injure any book, shall pay the full cost of the book, or entire work, if there be more than one volume.

II. No student shall have more than one volume out of the Library at a time.

III. Students must not pass books from one to another, but must return them to the Librarian.

IV. Library books must not be used as class books.

V. Books must not be retained longer than 3 days or *one week*. They may be borrowed again, if not wanted by others.

VI. Text-books and books of reference shall not be taken home.

Accession No. 251 271 Class M No. 9 13 X

Date of addition to Library.....

Cost Rs.....As.....3.....

271
M13

L-1904
L-1904

SASTHRAMUKTHAVALI- 29,30.

ಶಾಸ್ತ್ರಮುಕ್ತಾವಳಿ ಪುಸ್ತಕ

XXIV 9 666

BHÊDAVÂDA
AND
THATHKRATHUNAYAVICHARA.

भेदवादः- तत्क्रतुनयविचारश्च,

श्रीशैलानन्तपूरुषवंश्येन यादवाद्रिनिवासिना

अनन्तार्यवर्येण

विरचितौ

श्रीकाञ्चीप्रतिवादिभयङ्करम्

अनन्ताचार्येण परिशोधितौ

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्र्येताम् ।

ಪುಸ್ತಕ ಸಂಖ್ಯೆ 1-190

१९०७.

PRICE AS-3.] [मूल्यं कलात्रयम् ।

PRINTED AT THE SRI SUDARSANA PRESS
CONJEEVERAM.
ALL RIGHTS RESERVED.

श्रीरस्तु ।

शास्त्रमुक्तावळी ।

भेदवादः ।

यस्य श्रीनखकान्तिनाकसरितः कूर्मायतेङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवक्त्रमकुटीमाला मराळायते ।
पश्यन्निर्जरयोषिदम्बकततिर्मीनप्रपञ्चायते
क्षोणीशाब्जलयः पयोजमुकुळन्त्यव्यात्स नारायणः ॥

यतीशानपदद्वन्द्वे नन्तानन्तार्यकोविदः ।
विधत्ते भेदविषयं वादं विविधयुक्तिभिः ॥

अत्राद्वैतवादिनो वदन्ति- प्रमाणानुपपत्तेः प्रमेयानुपपत्तेश्च भेदो नास्तीति । तत्र प्रमाणानुपपत्तिः- प्रत्यक्षादिप्रमाणागोचरत्वम् । तथाहि— भेदस्तावन्न प्रत्यक्षेण गृह्यते, तस्य सन्मात्रविषयकत्वात् । इन्द्रिय सन्निकर्षानन्तरं सद्रूपब्रह्ममात्रविषयकं निष्प्रकारकं निर्विकल्पकं प्रत्यक्षं जायते ; तदेव प्रमाणम्, अज्ञाननिवर्तकत्वात ; अज्ञाननिवर्तकज्ञानत्व स्यैव प्रमालक्षणत्वात् । स्मृतेश्शुक्तिरूप्यभ्रमस्य च वारणाय अज्ञाननि-वर्तकेति । स्मृतेर्ज्ञातार्थविषयकत्वेन अज्ञाननिवर्तकत्वाभावात्, प्रातिभासिकस्य ज्ञाततैकसतोज्ञानाविषयत्वेन तद्विषयकज्ञानस्यापि तथात्वाभावाद्व्यावृत्तिः । निर्विकल्पकानन्तरं जायमानं घटोस्तीत्यादिसविकल्पकज्ञानंतु न प्रमाणम्, अज्ञाननिवर्तकत्वाभावात्; घटादेर्जडत्वेनाज्ञानाविषयत्वात्, सद्रूपविषयकाज्ञा नस्य पूर्वज्ञानेनैव निवृत्तत्वात् । एवंच घटादिरूपभेदस्य सविकल्पकविषय त्वेपि प्रमाणभूतनिर्विकल्पकविषयत्वं न सम्भवति । नचेन्द्रियसन्निकर्षानन्तरं घटोस्तीत्याकारकं सविकल्पकमेव जायते नतु निर्विकल्पकम्, मानाभा-वात्, तथाच सविकल्पकस्यैव सद्रूपाज्ञाननिवर्तकत्वात् प्रमाणत्वं यु-ज्यत इति वाच्यम् ; घटादिरूपभेदज्ञाने प्रतियोग्यनुयोगिज्ञानयोः

कारणतया भेदग्रहणरूपसविकल्पकात्पूर्वं अनुयोगिज्ञानरूपनिर्विकल्पकस्यावश्यकतया तेनैवाज्ञाननिवृत्तेः सविकल्पकस्य तन्निवर्तकत्वायोगात् । नच प्रतियोग्यादिज्ञानं विनापि प्रमेयत्वादिना भेदज्ञानोत्पत्त्या भेदत्वावच्छिन्नविषयताशालिज्ञान एव तस्य हेतुत्वात् घटत्वादिना भेदज्ञाने तस्य हेतुत्वमप्रामाणिकमिति वाच्यम् , भेदत्वं हि इतरतादात्म्यधीप्रतिबन्धकतावच्छेदकविषयिताकधर्मः , "भेदग्रहणेनैव हि अभेदनिवृत्ति" रिति श्रीभाष्योक्तेः- 'अभेदग्रहणनिवृत्ति' रित्यर्थस्य टीकायामुक्तत्वात् ; तथाच अयं पटभिन्न इति ज्ञान इव अयं घट इति ज्ञानेपि पटादितादात्म्यधीप्रतिबन्धात् घटत्वस्यापि भेदत्वरूपत्वावश्यकतया तदवच्छिन्नविषयताकज्ञानेपि प्रतियोग्यादिज्ञानकारणत्वस्यानपवादात्। उक्तं हि टीकायाम्—

> " भिन्न इति व्यवहार इव घट इत्यसाधारणव्यवहारेपि घटस्य पटाद्व्यावृत्ततया प्रतीतौ प्रतियोगिसापेक्षत्वात् घटव्यवहार एव भेदव्यवहार" इति ।

नच सद्रूपविषयकनिर्विकल्पकपूर्वकस्य घटादिसविकल्पकस्य सद्रूपाज्ञाननिवर्तकत्वासम्भवेपि घटाद्यज्ञाननिवर्तकत्वात् प्रमात्वमुपपद्यते, घटं न जानामीति प्रतीत्या तद्विषयकाज्ञानस्यापि सिद्धेरिति वाच्यम् , घटाद्यवच्छेदेन चितस्स्फुरणवारणाय घटाद्यवच्छेदेन चिति अज्ञानविषयताया अवश्यं कल्पनीयतया तदवच्छेदकत्वेनैव घटादीनां स्फुरणस्य घटं न जानामीति प्रतीतेश्च उपपत्तौ तत्राज्ञानविषयताकल्पने गौरवात् ; घटादिसविकल्पकस्य तन्निष्ठाज्ञानविषयतावच्छेदकतानिवर्तकत्वेपि अज्ञानन्निवर्तकत्वाभावात् ।

नन्वेवं भेदस्य सविकल्पकात्मकप्रत्यक्षविषयत्वेपि तथाविधप्रत्यक्षस्य प्रमाणत्वाभावात् भेदस्य प्रमाणाविषयत्वमिति प्रमाणानुपपत्तिवर्णनमयुक्तम् , उक्तरीत्या प्रत्यक्षविषयताया एव निराकर्तुं शक्यत्वात् , घटं साक्षात्करोमीति प्रतीतेः साक्षात्कारविषयतायाश्चिन्निष्ठाया घटादावच्छेदकत्वस्वीकारेणैव निर्वाहात् तद्विषयत्वानावश्यकत्वात् , अन्यथा

घटं नजानामीति प्रतीत्या घटादावज्ञानविषयतास्वीकारप्रसङ्गादिति चेत् ? सत्यम्, नव्याद्वैतिभिः घटादेरुक्तरीत्या प्रत्यक्षविषयतामनङ्गीकृत्यैव प्रमाणानुपपत्तिवर्णनात्; प्राचीनैस्तु पररीत्या प्रत्यक्षविषयत्वाङ्गीकारेपि प्रमाणानुपपत्तिस्सम्भवतीत्यभिप्रायेण तथोपपादनात् । अनूदिताचेयं प्रमाणानुपपत्तिश्श्रीभाष्ये महापूर्वपक्षे —

> "घटोस्तीत्यत्र अस्तित्वं तद्भेदश्च व्यवह्रियते; नच द्वयोरपि व्यवहारयोः प्रत्यक्षमूलत्वं सम्भवति, तयोर्भिन्नकालज्ञानफलत्वात्, प्रत्यक्षज्ञानस्यच एकक्षणवृत्तित्वात्; तत्र स्वरूपं भेदो वा प्रत्यक्षस्य विषय इति विवेचनीयम्, भेदग्रहणस्य स्वरूपग्रहणतत्प्रतियोगि स्मरणसव्यपेक्षत्वादेव स्वरूपविषयत्वमवश्याश्रयणीयमिति नभेदः प्रत्यक्षेण गृह्यते, अतो भ्रान्तिमूल एव भेदव्यवहार" इति।

अयमर्थः— घटोस्तीति सद्रूपब्रह्मविशेष्यकघटादिरूपभेदप्रकारक-व्यवहारस्तावदनुभवसिद्धः, तादृशव्यवहारेच सद्रूपनिष्ठविशेष्यतानिरूपित घटादिनिष्ठप्रकारताशालिज्ञानं कारणं वाच्यम्, तच्च ज्ञानं नैकम्, सद्रूपज्ञानस्य प्रमात्वेन घटादिज्ञानस्यच भ्रमत्वेन भ्रमत्वप्रमात्वयोर्विरोधेन एकत्रासमावेशात्; किन्तु निरूप्यनिरूपकभावापन्नविषयताकं ज्ञानद्वयम्, अतएवेदं रजतमित्यत्र अधिष्ठानांशे अन्तःकरणवृत्तिः- अध्यस्तांशे अविद्यावृत्तिरिति ज्ञानद्वयं स्वीक्रियते; नच नेदं रजतमिति प्रत्यक्षेण रजतस्य बाधितत्वात् तद्विषयकज्ञानस्य भ्रमत्वेपि घटादेरबाधितत्वात् तज्ज्ञानस्य भ्रमत्वन्न युज्यत इति वाच्यम्, घटादेः प्रत्यक्षबाधाभावेपि व्यावर्तमानत्वाद्यनुमानेन बाधस्य वक्ष्यमाणत्वात्; नच संयोगतदभावयोः अभ्रमूलाद्यवच्छेदकभेदेनेव प्रमात्वभ्रमत्वयोरपि सद्रूपविषयकत्वघटादिविषयकत्वरूपावच्छेदकभेदेन सम्भवात् ज्ञानैक्यमुपपद्यत इति वाच्यम्, सद्रूपात्मकानुयोगिज्ञानं विना घटादिरूपभेदज्ञानायोगेन प्रथमत एव सद्रूपघटोभयविषयकज्ञानासम्भवात्; नच प्रत्यक्षस्य

युगपदुभयविषयकत्वासम्भवेपि प्रथमं सद्रूपविषयकत्वं तदनन्तरं भेदविषयकत्वमिति क्रमेण उभयविषयकत्वं सम्भवति, एकस्यापिज्ञानस्य सद्रूपविषयकत्वेन कारणतायाः भेदविषयकत्वेन कार्यताश्च सम्भवात्, एकस्या एव मृदः घटत्वकपालत्वरूपावस्थाभेदेन कार्यकारणभावदर्शनात्, आरम्भणाधिकरणे अभेदेपि कार्यकारणभावव्यवस्थापनादिति वाच्यम्,- प्रत्यक्षज्ञानस्य एकक्षणवृत्तित्वेन क्रमेण उभयविषयकत्वायोगात्; अतः प्रत्यक्षे स्वरूपविषयकत्वभेदविषयकत्वयोरन्यतरस्य वाच्यतया प्रत्यक्षात्पूर्वं प्रतियोगिज्ञानादिरूपकारणाभावेन प्रत्यक्षे भेदविषयकत्वासम्भवात् स्वरूपविषयकत्वमवश्यमङ्गीकरणीयमिति भेदो न प्रत्यक्षविषयः, किन्तु भ्रान्तिविषय इति ।

तथाच संवित्सिद्धौ –

" यौगपद्यक्रमायोगात् व्यवच्छेद-विधानयोः ।
ऐक्यायोगाच्च भेदो न प्रत्यक्ष इति यो भ्रमः " ॥ इति ।

व्यवच्छेदो भेदग्रहणम् । विधानं स्वरूपग्रहणम् ।

एवंच भेदस्य प्रत्यक्षाविषयत्वेन तन्मूलकप्रमाणान्तराविषयत्वात् भेदे प्रमाणानुपपत्तिरिति ।

अत्रोच्यते - भेदे प्रमाणानुपपत्तिस्तावदयुक्ता, घटादिरूपभेदस्य घटोस्तीत्यादिप्रत्यक्षसिद्धत्वात्,तथाविधप्रत्यक्षस्यापि तद्वति तत्प्रकारकत्वेन प्रमात्वात्, तद्वति तत्प्रकारकानुभवस्यैव प्रमात्वात्; तद्वति तत्प्रकारकानुभवत्वस्यैव प्रमालक्षणत्वात्। इदमाकारान्तःकरणवृत्तौ धारावाहिकद्वितीयादिज्ञाने सुखादिप्रमायां चाव्याप्तया अज्ञाननिवर्तकज्ञानत्वस्य प्रमालक्षणत्वायोगात् । अज्ञाननिवर्तकज्ञानत्वस्य प्रमालक्षणत्वेपि घटोस्तीति ज्ञानस्य प्रमात्वं युज्यते, भवदभिमत निर्विकल्पकस्याप्रामाणिकत्वेन उक्तज्ञानस्यैवाज्ञाननिवर्तकत्वात्। भेदत्वावच्छिन्नविषयताशालिज्ञाने अनुयोगिज्ञानस्य कारणत्वेपि घटत्वाद्यवच्छिन्न

विषयताशालिज्ञाने तस्य हेतुत्वस्याप्रामाणिकतया उक्तज्ञानात्पूर्वं सन्मात्र विषयकज्ञानानावश्यकत्वात् । इतरतादात्म्यधीप्रतिबन्धकतावच्छेदकविषयितानिरूपकधर्मरूपतया घटत्वमपि भेदत्वात्मकमेवेत्यपि नयुक्तम्, तथासति घटो भेद इत्यनयोः पर्यायतापसङ्गात् । चक्षुराद्ययोग्यबुध्यादिघटितत्वेन भेदत्वस्य घटे पटभेद इति चाक्षुषादिविषयत्वानुपपत्तेश्च । किन्तु प्रतियोग्यवृत्त्यभावत्वमेव भेदत्वम्, अत्यन्ताभावस्य प्रतियोगिवृत्तित्वेन व्यावृत्तेः । 'भेदग्रहणेनैव हि अभेदनिवृत्ति' रिति भाष्यमपि उक्तलक्षणपरमेव ; "भेद ग्रहणेन"— गृह्यमाणभेदेन, "अभेदनिवृत्तिः"— प्रतियोग्यभेदस्य वैय्यधिकरण्यम्, तथाच प्रतियोग्यभेदासमानाधिकरणाभावत्वं प्रतियोग्यवृत्त्यभावत्वपर्यवसितं भेदत्वमिति तद्बाध्यार्थात् । अव्याप्यवृत्तिसंयोगाद्यत्यन्ताभावस्य वृक्षादौ स्वीकारेपि तद्बुद्धेदानङ्गीकारेण तत्राप्यव्याप्त्यभावात् । नच ध्वंसप्रागभावयोरुक्तलक्षणातिव्याप्तिरिति वाच्यम्, प्रतियोगिसमानकालीनत्वस्यापि विशेषणत्वात् ।

यत्तु शतदूषण्यां व्यावृत्तव्यवहारहेतुत्वमिति श्रुतप्रकाशिकायां च व्यावृत्तिबुद्धिहेतुत्वं तदिति लक्षणमभिहितम्, तत्र हेतुत्वस्य फलोपधायकत्वरूपस्य निवेशे व्यावृत्तव्यवहारस्य तद्बुद्धेश्चानुत्पाददशायामव्याप्तेः जनकतावच्छेदकधर्मवत्त्वरूपस्वरूपयोग्यताया एव निवेशनीयतया तथाविधधर्मस्य प्रतियोग्यवृत्त्यभावत्वरूपत्वेन उक्तलक्षण एव पर्यवसानान्न विरोधः । यथाश्रुतन्तु न सङ्गच्छते, उक्तलक्षणयोर्व्यवहारविषयतया बुद्धिविषयतयाच प्रविष्टाया व्यावृत्तेः भेदरूपत्वेनात्माश्रयात् । नच व्यावृत्तव्यवहारतद्बुद्ध्योः तद्व्यक्तित्वेन निवेशात् नात्माश्रय इति वाच्यम्, तथापि चक्षुराद्ययोग्यव्यवहारादिघटितत्वेन भेदत्वस्य चाक्षुषप्रत्यक्षानुपपत्तेरुक्तत्वात् ।

एतेन—

"यस्मिन् यद्दर्शने येषामध्यासो नोपपद्यते ।
तस्य भेदस्स तेभ्यस्स्यात्तदुक्तिस्तु विवक्षया ॥ "

इति शतदूषणीकारिकापि व्याख्याता वेदितव्या, तादात्म्याध्यासानुत्पादप्रयोजकधर्मवत्त्वस्य भेदलक्षणत्वे पर्यवसानेन तादृशधर्मस्य प्रतियोग्यवृत्त्यभावत्वरूपत्वात् ।

ननु भेदत्वावच्छिन्नविषयताशालिज्ञाने प्रतियोगिज्ञानस्य न कारणत्वम्, प्रतियोग्यविषयकस्य भिन्नो घट इत्यादिज्ञानस्य भेदत्वप्रकारकस्य प्रतियोगिज्ञानं विनाप्युत्पत्तेः, भेदत्वाप्रकारकस्यापि घटप्रतियोगिकत्वेन भेदविषयकस्य घटीयवान् पट इति ज्ञानस्य प्रतियोगिज्ञानं विनानुत्पत्तेश्च; किन्तु प्रतियोगिनिष्ठविषयतानिरूपितभेदनिष्ठविषयताशालिज्ञाने प्रतियोगिज्ञानस्य कारणत्वम्, एवमनुयोगिविषयतानिरूपितभेदविषयताशालिज्ञाने अनुयोगिज्ञानस्य कारणत्वमिति घटोस्तीति ज्ञानस्य प्रतियोग्यविषयकतया तत्र प्रतियोगिज्ञानस्य अहेतुत्वेपि तस्य अनुयोगिविषयकतया तज्ज्ञानस्य तत्र हेतुत्वमावश्यकम्; अतो निर्विकल्पकमभ्युपगन्तव्यमिति चेन्न; - विशिष्टबुद्धौ विशेषणज्ञानस्य कारणतया प्रतियोगिनो भेदविशेषणतया तज्ज्ञानस्य भेदज्ञाने कारणत्वेपि अनुयोगिनो विशेष्यतया तज्ज्ञानस्य तत्र हेतुत्वायोगात्, अनुयोगिविनिर्मोकेण भेदस्य भानानभ्युपगमे भेदज्ञानविषयत्वावश्यकत्वेपि पूर्वं तज्ज्ञानानावश्यकत्वात् । उक्तंच शतदूषण्यां " आश्रयप्रकाशापेक्षायामपि सहोपलम्भादेव नैराकांक्ष्य " मिति । यदिच अनुयोगिज्ञानस्य भेदज्ञान हेतुत्वमनुभवसिद्धमिति मन्यते, तथापि प्रत्यक्षस्य क्रमेण सद्रूपघटोभयविषयकत्वसम्भवः; नैय्यायिकादिभिरपि ज्ञानस्य क्षणद्वयावस्थायित्वाभ्युपगमेन एकक्षणमात्रवृत्तित्वस्याप्रामाणिकत्वात् । सिद्धान्तेच त्रिचतुरादि क्षणवृत्तित्वस्यापि स्वीकारात् । यत्तु श्रीभाष्ये—

" एकक्षणवृत्तित्वेपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूप तत्संस्थानरूपगोत्वादेर्गृहीतत्वात् क्षणान्तरग्राह्यं न किंचिदिह तिष्ठति । " इत्युक्तम्, तत्र एकक्षणवृत्तित्वांशे अभ्युपगम्यवाद एव, अपिना तत्सूचनात्; विशेष्यभूतानुयोगिज्ञानस्य भेदज्ञाने कारणत्वाभावेन प्रत्यक्षस्य

क्षणिकत्वेपि भेदस्य तद्विषयता सम्भवतीत्यभिप्रायकत्वात्। अतएव टीकायां

"प्रत्यक्षज्ञानस्य त्रिचतुरक्षणमात्रवृत्तित्वेपि एकक्षणवृत्तित्वमभ्युपगम्य परिहरति 'एकक्षण वृत्तित्वेपीति"

इति तद्धाप्यमवतारितम्। नचैकज्ञाने भ्रमत्वप्रमात्वयोर्विरोधात् सद्रूपघटोभयविषयकत्वं क्रमेणापि न सम्भवतीति वाच्यम्, अवच्छेदकभेदेन तयोस्सत्वे बाधकाभावात्। व्यावर्तमानत्वाद्यनुमानस्य निरसिष्यमाणतया प्रत्यक्षस्य घटाद्यंशेपि प्रमात्वाच्च। इत्थंच भेदस्य प्रत्यक्षत्वात् न तत्र प्रमाणानुपपत्तिः।

नापि प्रमेयानुपपत्तिः, प्रमाणाधीनसिद्धिके वस्तुनि प्रमेयानुपपत्तेरयोगात्; नहि दृष्टे अनुपपन्नन्नामेति न्यायात्। अत्रेत्थं प्रमेयानुपपत्तिरनूदिता श्रीमति भाष्ये- भेदः किं घटादेः स्वरूपं धर्मो वा? नाद्यः, घटादिज्ञानानन्तरं घट इत्यादि व्यवहारात् स्वस्मात् भिन्न इति व्यवहारापत्तेः; नच भेदस्य सप्रतियोगिकत्वेन तद्व्यवहारे प्रतियोगिज्ञानस्य कारणतया तदभावात् न तदानीमेव भेदव्यवहार इति वाच्यम्, भेदस्य घटादिस्वरूपत्वे स्वरूपस्य निष्प्रतियोगिकत्वेन तदभिन्नभेदस्य सप्रतियोगिकत्वासम्भवात्; सप्रतियोगिकत्वनिष्प्रतियोगिकत्वयोर्विरोधेन एकत्रा समावेशात्; तथाच स्वरूपव्यवहार इव भेदव्यवहारेपि प्रतियोगिज्ञानस्य कारणत्वं नसम्भवति; एवं भेदस्य घटादिस्वरूत्वे हस्तः कर इतिवद्घटो भिन्न इति पर्यायतापत्तिश्च। नद्वितीयः, भेदस्य धर्मत्वे तस्य स्वरूपात् भेदो ऽवश्याश्रयणीयः, अन्यथा स्वरूपमेव स्यात्, भेदेच तस्यापि भेदः तद्धर्मः तस्यापीत्यनवस्था। धर्मपक्षे अन्योन्याश्रयणं च। त्रेथाच तत्, धर्मिणि प्रतियोगिनि च गृहीते भेदग्रहणं भेदे गृहीते धर्मिप्रतियोगिग्रहणमिति; धर्मे धर्मिणिच गृहीते भेदग्रहणं भेदे गृहीते धर्मधर्मिग्रहणमिति; अयं घट इत्यत्र इदंशब्दनिर्दिष्टस्य घटजातिविशिष्टत्व ग्रहणं पटजातीयाद्भेदग्रहणपूर्वकम्, अन्यथा घटजातीयत्वविरोधात्, पटा-

द्भेदग्रहणं इदंशब्दनिर्दिष्टस्य घटजातीयत्वग्रहणपूर्वकं, अन्यथा पटत्व प्रसङ्गात् इति। एवं धर्मितया प्रतियोगितया च ग्रहणे धर्मधर्मिग्रहणे तत्तज्जातीयत्वग्रहणेच त्रेधा ऽन्योन्याश्रयणमिति ।

ननु भेदस्य स्वरूपतापक्षे घटो भिन्न इति पर्यायतापादनमयुक्तम्, भेदस्य स्वरूपत्वे घटो भेद इति पर्यायत्वापादनस्यैव युक्तत्वादिति चेन्न;– स्वरूपतापक्षे भिन्न इत्यत्र क्तप्रत्ययस्याश्रयार्थकत्वं न सम्भवति, अभेदे आश्रयाश्रयिभावानुपपत्तेः, अतो भावार्थकत्वं तादात्म्यसम्बन्धेन सम्बन्ध्यर्थकत्वं वा वाच्यमित्यभिप्रायेण तथापादनात् । नचोक्ताभिप्रायेण उक्तरीत्या पर्यायत्वापादनापेक्षयार्जवेन घटो भेद इति पर्यायत्वापादनं युज्यत इति वाच्यम् ; घटो भेद इति पर्यायतापादने इष्टापत्तौ दूषणं नास्ति, घटो भिन्न इति पर्यायत्वापादने च इष्टापत्तौ सहप्रयोगानुपपत्तिरूपदूषणमस्तीत्यभिप्रायेण तथापादनात् ।

टीकायान्तु– स्वरूपपक्षे दूषणान्तराण्यप्यनूदितानि । तथाहि–"स्वरूपपक्षे भिन्न इति व्यवहर्तुं न युक्तम्, भिन्नो हि भेदयोगी; एतद्व्यवहारसिद्धये यदि स्वरूपभूतभेदान्तरं स्वीक्रियते, तत्रापि भिन्न इति व्यवहारस्यायुक्तत्वात्तत्स्वरूपभूतभेदान्तरमाश्रयणीयमित्यनवस्था । किञ्च शब्दान्तरेण धर्म इत्युक्तं स्यात् । तथाच धर्मपक्षदूषणान्यापतेयुः । किञ्च- भेदः किमनुवृत्तः, उत व्यावृत्तः? व्यावृत्तश्चेत्, स किं स्वरूपम्, उत धर्मः? प्रथमे घटस्य भेदव्यवहारे कृते पटविषयभेदव्यवहारो न स्यात्, व्यावृत्तत्वात् । धर्मश्चेत्? पूर्वोक्तदोषः, धर्मत्वप्रयुक्तदूषणानि च स्युः । यद्यनुवृत्तः, सच स्वरूपश्चेत्? शब्दान्तरेण सन्मात्रमङ्गीकृतं स्यात् । धर्मपक्षे पूर्ववत् । किञ्च- भेदिधातोर्हि विदारणमर्थः, एकस्य वस्तुनो भेदो नाम द्विधाभावः, तत्खण्डस्यापि तथा स्यात् । अतो वस्तुनि भेदाभ्युपगमे विदारणपरम्परया वस्तुनाश एव स्या" दिति । अतः प्रमेयानुपपत्त्या भेदो दुर्निरूप इति ।

अत्रोच्यते- इयं तावत्प्रमेयानुपपत्तिरयुक्ता, गवादौ विद्यमानस्य महिषादिभेदस्य गोत्वादिसंस्थानरूपतायाः संस्थानगतस्यापि तस्य संस्थान रूपतायाः स्वीकारेण धर्मिणि भेदस्य धर्मस्वरूपत्वं धर्मेच तस्य स्वरूपात्मकत्वमित्युपपादनात् । नच संस्थानगतभेदस्य स्वरूपात्मकत्वं न सम्भवति, सप्रतियोगिकत्वनिष्प्रतियोगिकत्वयोर्विरोधादिति वाच्यम्, संस्थानत्वेन निष्प्रतियोगिकत्वं भेदत्वेन सप्रतियोगिकत्वमित्यवच्छेदक भेदेन तयोस्स्वीकारात् । घटत्वेन निष्प्रतियोगिकस्यापि घटस्य घटाभावाभाव त्वेन सप्रतियोगिकतायास्तार्किकादिभिरपि अभ्युपगमात् । अनृतजड परिच्छिन्नव्यावृत्तीनां सप्रतियोगिकानामविद्यानिवृत्तेश्च तथाविधाया निष्प्रति योगिकब्रह्मस्वरूपत्वाङ्गीकारेणावच्छेदकभेदेन तयोरविरोधस्य भवद्भिर- प्युपपादनीयत्वात् । संस्थानस्वरूपत्वे भेदस्य संस्थानं भिन्नमित्यनयोः पर्यायत्वापत्तिरित्यपि न युक्तम्, संस्थानत्वभेदत्वयोः प्रवृत्तिनिमित्तयो र्भेदात्; एकधर्मावच्छिन्नशक्तिनिरूपकत्वस्यैव पर्यायतारूपत्वात् । एक धर्मिशक्तत्वस्य तथात्वे घटो नील इत्यनयोरपि तथात्वापत्तेः । स्वरूप पक्षे " भिन्नो हि भेदयोगी " त्यादिटीकोक्तदूषणान्यपि न सम्भवन्ति, अभेदेप्याधाराधेयभावाभ्युपगमेन भेदस्य संस्थानधर्मत्वाभावेपि संस्थानं भिन्नमिति व्यवहारस्योपपत्तेः । नच एकस्यैव आधारत्वाधेयत्वयोः स्वीकारे आत्माश्रय इति वाच्यम्, अगत्या तत्र तस्य दोषत्वानभ्युपगमात् । अन्यथा अस्तीत्यादिव्यावृत्तेः ब्रह्मधर्मत्वाभावेन ब्रह्म अस्त्यादिभिन्नमिति व्यवहारस्य भवतामपि दुरुपपादत्वापत्तेः । भेदस्य महिषादिव्यावृत्त गोत्वादिसंस्थानरूपत्वे महिषादौ भेदव्यवहारानुपपत्तिरित्यपि न, महिष- त्वादिरूपसंस्थानस्वरूपताया अपि स्वीकारात् । भिदिधातोर्विदारणार्थ- कत्वात् संस्थानस्य भेदरूपत्वे संस्थानस्यापि विदारणापत्त्या वस्तु स्वरूपनाश एव स्यादित्यपि दुरुक्तम्; भिदिधातोर्विदारणार्थकत्वस्ये- बान्योन्याभावार्थकत्वस्यापि लोकव्यवहारसिद्धत्वात् । भेदस्य विदारणरू-

पत्वोक्तेरत्यन्तमसम्भावितत्वात् । अन्यथा अनृतजडादिभेदरूपस्य ब्रह्मणोपि विदारणापत्तेः । " भिदिविदारण " इति धातुपाठस्य च उपलक्षणपरत्वात् । उक्तंच शाब्दिकैः—

" क्रियावाचित्वमाख्यातुमेको प्यर्थः प्रदर्श्यते ।
ऽप्रयोगतोऽनुसर्तव्या अनेकार्था हि धातवः ॥ " इति ।

यत्तु- घटधर्मेषु पटप्रतियोगिकभेदवत् घटप्रतियोगिकभेदस्यापि सत्त्वात् पटात् भिन्नो घट इतिवत् घटात् भिन्नो घट इत्यपि प्रतीतिस्यादिति ; तन्न, घटभेदस्य घटत्वात्मकत्वेपि घटभेदत्वावच्छिन्नाधेयतानिरूपकत्वस्य घटादावस्वीकारेणैव तादृशप्रतीतिवारणात् । ब्रह्म अनृताद्भिन्नमिति व्यवहारोपपत्तये अभेदेपि आधाराधेयभावाङ्गीकारेपि ब्रह्म ब्रह्मवदिति व्यवहारापत्तेः ब्रह्मत्वावच्छिन्नाधेयतानिरूपकत्वस्य ब्रह्मण्य स्वीकारेणैव भवद्भिरपि वारणीयत्वात् ।

एतेन धर्मपक्षे अनवस्था निरस्ता, धर्मिणि विद्यमानभेदस्य धर्मस्वरूपत्वेपि धर्मे तस्य धर्मान्तरस्वरूपत्वानभ्युपगमात् ; तद्धर्मरूपताया एव स्वीकारात् । उक्तं च श्रीमति भाष्ये—

"यत्तु.... भेदश्च विकल्पासहत्वात् दुर्निरूप इत्युक्तम्, तदपि.... जात्यादेरेव प्रतियोग्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वाच्च दूरोत्सारितम्, संवेदनवत् रूपादिवच्च परत्र व्यवहाराविशेषहेतोः स्वस्मिन्नपि तद्व्यवहारहेतुत्वं युष्माभिरभ्युपेतं भेदस्यापि सम्भवत्येव, अत एव नानवस्थान्योन्याश्रयणम्" इति ।

अयं भावः- ज्ञानस्य ज्ञानान्तरवेद्यत्वे ज्ञानान्तरस्यापि ज्ञानान्तर वेद्यत्वमित्यनवस्था , पूर्वज्ञानस्य उत्तरज्ञानं ग्राहकं उत्तरस्यच पूर्वमित्यङ्गीकारे अन्योन्याश्रयः, ज्ञानत्रयस्वीकारे चक्रकम् , स्वस्य स्ववेद्यत्वे आत्माश्रयदोषे प्राप्ते यथा लाघवादात्माश्रयस्यादोषत्वमभ्युपगम्यते तथा

भेदस्थलेपि, प्रमाणानुरोधिपदार्थसिद्धावात्माश्रयान्योन्याश्रयानवस्थादिदोष प्राप्तौ आत्माश्रयस्यादोषत्वाभ्युपगमेनैव समाधानस्य शास्त्रकारसम्मतत्वात्। "समवायाभ्युपगमाच्च साम्यादनवस्थिते" रिति सूत्रे आत्माश्रयस्यादोषतायास्सूत्रकृतैव स्वीकारात्। अयमत्र तत्सूत्रार्थः- गुणगुण्यादिस्थले विशेषणविशेष्याभ्यामतिरिक्तस्य सम्बन्धान्तरस्य कल्पने सम्बन्धान्तरस्यापि सम्बन्धान्तरं तस्यापि तथेत्यनवस्था, यदिच सम्बन्धद्वयमभ्युपगम्यते तयोश्च परस्परं सम्बन्धता स्वीक्रियते तदान्योन्याश्रयः, सम्बन्धत्रय स्वीकारे चक्रकम्, स्वस्य स्वयमेव सम्बन्धत्वे आत्माश्रयः; अगत्या आत्माश्रयस्यादोषत्वेच विशेषणविशेष्यस्वरूपस्यैव सम्बन्धत्वकल्पनमुचितम्, विशेषणविशेष्यातिरिक्तसम्बन्धमभ्युपगम्य तत्रात्माश्रयस्यादोषत्वाभ्युपगमापेक्षया स्वरूपे तथाभ्युपगमे लाघवादिति। उक्तंच तत्सूत्रे श्रुतप्रकाशिकायाम् -

> "अनुपलब्धं समवायं कल्पयित्वा तस्योपपादकान्तरनैरपेक्ष्य कल्पनादपि प्रत्यक्षसिद्धस्याप्यथक्सिद्धवस्त्वाधाराधेयस्वभावस्यैव सम्बन्धत्वोपपादकान्तरनैरपेक्ष्यकल्पनं युक्तम्, धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायात्" इति।

अतो भेदस्य धर्मत्वे अनवस्थाकथनमयुक्तम्। अन्योन्याश्रयापादनन्त्वलग्नकमेव, भेदज्ञाने धर्मिप्रतियोगिज्ञानस्य कारणत्वेपि धर्मिप्रतियोगिज्ञाने भेदज्ञानस्य कारणत्वाभावात्। अश्वत्वगोत्वादिना धर्मिप्रतियोगि ज्ञानस्य भेदज्ञानं विनापि सम्भवात्।

यत्तु-अश्वे गोभेदज्ञाने गवि अश्वभेदज्ञानं कारणं वाच्यम्, अश्वभेदसंशयव्यतिरेकनिश्चयदशायां अश्वे गोभेदज्ञानानुदयात्, यत्संशयव्यतिरेकनिश्चयौ यत्र प्रतिबन्धकौ तन्निश्चयः तत्र हेतुरिति नियमात्; एवं गवि अश्वभेदज्ञाने अश्वे गोभेदज्ञानं कारणमिति अन्योन्याश्रयणमुपपन्नम्; जात्यादिविशिष्टवस्तुग्रहणे सति भेदग्रहणमिति प्राचीनवाक्यस्यापि अयमेवार्थः, जात्यादि

विशिष्टवस्तुनः गवादेः, ग्रहणेसति- अनुयोगिभूताश्वभिन्नतया ग्रहणे सति, भेदग्रहणम्, अश्वे गोभेदग्रहणम्- तस्मिन् सति जात्यादिविशिष्टगवादावश्वभेदग्रहणमिति तद्वाक्ययोजनात्; इति भेदधिक्कारकृतामन्योन्याश्रयलापनम्; तन्न, यत्संशयेत्यादिनियमाङ्गीकारे अव्यभिचारनिश्चये अव्यभिचारनिश्चयस्य हेतुत्वापत्तेः, अव्यभिचारसंशयतद्व्यतिरेकभूतव्यभिचारनिश्चययोः तत्र प्रतिबन्धकत्वात्। नच ग्राह्यसंशयस्याप्रतिबन्धकत्वात् नेयमापत्तिः, अन्यथा घटादिज्ञाने पि तन्निश्चयस्य हेतुताप्रसङ्ग इति । *

इति श्रीशैलानन्तपूरुषवंश्यस्य यादवाद्रिनिवासरसिकस्य

अनन्तार्यस्य कृतिषु

भेदवादः ।

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोयं विजृम्भताम् ।

---

* एतावानेवायं ग्रन्थ उपलभ्यते ।

श्रीरस्तु ।

शास्त्रमुक्तावळी ।

तत्क्रतुन्यायविचारः ।

यदुभूधराग्रनिलयं वन्दित्वा श्रीपतिं यतीन्द्रं च ।
तत्क्रतुनीतिविचारं कलयति कुतुकादनन्तार्यः ॥

यत्र देशविशेषावच्छिन्नब्रह्मसाक्षात्कारात्मकमुक्तित्वं तत्र स्वजन्यत्वं स्वान्यूनानतिरिक्तविषयकत्व उभयसम्बन्धेन उपासनाविशिष्टत्वमिति व्याप्तिः तत्क्रतुन्यायप्रकटिता ।

अथ - उक्तार्थकत्वं न प्रतीयते, किन्तूक्तन्यायग्राहकात् " यथाक्रतु रस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवती " ति श्रुतिवाक्यात् यद्धर्मप्रकारकोपासनवत्त्वं यस्य तस्य तद्धर्मवत्त्वमित्येव प्रतीयते; अस्मिन् लोके पुरुषो यथाक्रतुर्भवतीत्यस्य यद्धर्मप्रकारकोपासनाभिन्नासाधारणधर्मवान् इत्यर्थात्, तथाभवतीत्यस्य तादृशधर्माभिन्नासाधारणधर्मवानित्यर्थात्; यथेतिपदार्थस्य यदभिन्नप्रकारस्य प्रकारतासम्बन्धेन क्रतुपदार्थोपासने तस्य चाभेदसम्बन्धेन भूधात्वर्थासाधारणधर्मे तथाशब्दार्थतदभिन्नप्रकारस्या प्यभेदेन भूधात्वर्थासाधारणधर्मे अन्वयात्; " स य एतमेवं विद्वान् चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिन् लोके भवति स य एतमेवं विद्वान् चतुष्कलं पादं ब्रह्मणोनन्तवानित्युपास्ते अनन्तवा नस्मिन् लोके भवती " त्यादिषु उपासनफलवाक्येषु उपासनप्रकारव-त्ताया एव फलत्वाभिधानेन उक्तार्थस्यासम्भवात्; नच जीवब्रह्मणो र्भेदात् ब्रह्मणि विद्यमानज्ञानानन्दादीनां उपासनप्रकाराणामुपासके अस-म्भवादुक्तव्याप्त्यसम्भव इति वाच्यम्, यद्धर्मावच्छिन्नप्रकारस्ताकोपासन

वत्त्वं यस्य तस्य तद्धर्मावच्छिन्नवत्त्वमिति व्याप्तिसम्भवात्; तद्धर्मावच्छिन्ने च ब्रह्मासाधारणधर्मभिन्नत्वं निवेश्यम्, तेन उपासनप्रकारस्य जगत्कारणत्वादेर्मुक्ते असम्भवेपि न क्षतिरिति ।

मैवम्, "अथ य एवं मुख्यप्राणस्तमुद्गीथमुपासाञ्चक्र" इत्यादि श्रुत्युक्तप्राणत्वप्रकारकोद्गीथविशेष्यकोपासनवति प्राणत्वाभावेन निरुक्तव्याप्तेरसम्भवात् । नच यद्धर्मावच्छिन्नप्रकारता यद्धर्मावच्छिन्नवन्निष्ठविशेष्यता निरूपितत्वेन विशेषणीया, तथाच प्राणत्वावच्छिन्नप्रकारताया अतथात्वात् न दोष इति वाच्यम्, तथाप्युद्गीथत्वादिमत्त्वस्य स्वस्मिन्नभावेन व्याप्तिभङ्गात् । नच ब्रह्मवृत्त्यसाधारणधर्माभिन्नत्वस्थाने विशेष्यवृत्त्यसाधारणधर्माभिन्नत्वनिवेशादुद्गीथवृत्त्यसाधारणधर्मस्यापि व्यावृत्तिरिति वाच्यम्, सत्यत्वज्ञानत्वानन्तत्वानामुपासनप्रकाराणां मध्ये सत्यत्वस्य मुक्ते सम्भवेपि नित्यासङ्कुचितज्ञानाश्रयत्वरूपज्ञानत्वस्य विभुत्वरूपदेशापरिच्छिन्नत्वघटितानन्तत्वस्य चासम्भवेन निरुक्तव्याप्तेरसम्भवात्; निरुक्तज्ञानस्य नित्यसाधारणत्वेन ब्रह्मासाधारणधर्माभिन्नत्वाक्षतेः । तस्मात् "तथा भवति" इत्यस्य तथानुभवतीत्यर्थाङ्गीकारेण तत्तद्धर्मप्रकारकसाक्षात्कारवानित्यर्थलाभात् उक्तव्याप्तिरेव उक्तश्रुतिलभ्या ।

नचैवमपि स्वान्यूनविषयकत्व स्वजन्यत्वोभयसम्बन्ध एव उक्तश्रुतिलभ्यः, नतु स्वानतिरिक्तविषयकत्वघटितसम्बन्ध इति वाच्यम्; "तं यथा यथोपासते तथैव भवती"ति श्रुत्या तादृशार्थलाभात्, एवकारस्य तदतिरिक्ताविषयकत्वपरत्वात्। नच उपासनाविषयगुणस्य मुक्तानुभवे प्रकारत्वानभ्युपगमे मुक्तस्य सर्वज्ञत्वानुपपत्त्या "सर्वं ह पश्यः पश्यती" त्यादिश्रुतिविरोध इति वाच्यम्, अनन्तत्वस्य सर्वोपासनप्रकारताया "आनन्दादयः प्रधानस्ये" ति सूत्रसिद्धत्वेन तस्य अनन्तगुणवत्त्वरूपवस्त्वपरिच्छेदघटितत्वेन ब्रह्मोपासनेषु सर्वत्र सर्वगुणानां सामान्यतो विषयत्वेन तदविषयगुणाप्रसिद्धेः। नच सामान्याकारज्ञानेषु विशेषधर्मानात् सर्वज्ञत्वानुपपत्तिरिति वाच्यम्,

ब्रह्मनिष्ठविशेष्यतानिरूपितप्रकारतावच्छेदकतया विशेषधर्माणामभानेपि ज्ञानान्तरे स्वातन्त्र्येण भानादेव सर्वज्ञत्वनिर्वाहात् ; एकेनैव ज्ञानेन सर्वज्ञत्वमुपपादनीयमिति निर्बन्धाभावात् । नहि ब्रह्मवृत्तियावद्धर्माण ां ब्रह्मानुभवे प्रकारतावच्छेदकतया भानमिति सम्भवति, तथा सति एकस्मिन्नपि गुणे वस्तुत्ववाच्यत्वप्रमेयत्वघटपटादिभेदतत्तद्घटितान्यतमत्वान्यतरत्व घटपटादिकालीनत्वाद्यनन्तधर्मसत्त्वेन तावतां प्रकारतावच्छेदकत्वापत्तेः । एवं तत्तद्धर्मप्रकारकज्ञानविषयत्वस्यापि प्रकारतावच्छेदकत्वे तत्प्रकारकज्ञानविषयत्वस्यापि प्रकारतावच्छेदकत्वापत्त्या अनवस्थापातात् ।

नचानतिरिक्तविषयकत्वस्यापि सम्बन्धघटकत्वे—

"उपासितगुणादेर्या प्राप्तावप्यबहिष्क्रिया ।
सा तत्क्रतुनयग्राह्या नाकारान्तरवर्जनम् ॥"

इति वेदान्ताचार्यसूक्तिविरोध इति वाच्यम् , उपासितगुणादेरबहिष्क्रिया — उपासनविषयगुणविषयकत्वरूपोपासनान्यूनविषयकत्वम् , उपासननिवर्त्यसंशयनिवर्तकतावच्छेदकविषयिताश्रयत्वपर्यवसितम् , तत्क्रतुनयग्राह्यम् - तत्क्रतुन्यायघटकमित्यर्थः , आकारान्तरवर्जनम् - उपासनाविषयगुणाद्यविषयकत्वम् , न तद्घटकम् , उपासनाविषयगुणाप्रसिद्धेः , किन्तु उपासनानिवर्त्यसंशयनिवर्तकतावच्छेदकविषयिताशून्यत्वरूपं तदनतिरिक्तविषयकत्वं तद्घटकम् , इत्यर्थाङ्गीकारेण तत्सूक्त्यविरोधात् । अनतिरिक्तविषयकत्वस्य तन्न्यायघटकत्वमेव नास्तीति तत्सूक्तितात्पर्येच "व्यतिरेकस्तद्भावभावित्वादि" ति सूत्रतद्भाष्यादिविरोधो दुरुद्धरः , 'प्राप्याकार एवानुसन्धेय' इति भाष्यवाक्यघटकैवकारेण प्राप्यभूतापहतपाप्मत्वादिगुणाष्टकविरोधिपापादिप्रयुक्तज्ञानसङ्कोचादिरूपावस्थावत्त्वरूपाज्ञत्वादिरूपबन्धावस्थानिषेधात् ।

यद्वा - "यथाक्रतुर्भवती" त्यत्र क्रतुशब्दार्थः प्राप्त्यनुकूलव्यापारः, स च वाचिककायिकमानसिकसाधारणः, यथेत्यस्य यत्कर्मकर्त्व इत्यर्थः ,


तस्य च क्रतुशब्दार्थैकदेशप्राप्तावन्वयः, तथा भवतीत्यस्य तत्कर्मक-प्राप्तिमान् भवतीत्यर्थः, तथाच यः यत्कर्मकप्राप्त्यनुकूलव्यापारवान् भवति सः तत्कर्मकप्राप्तिमान् भवतीत्यर्थः । अत एव "यथोपासनं प्राप्तिः श्रूयत" इति शरीरेभावाधिकरणभाष्यं सङ्गच्छते । अयं च न्यायः अवान्तरफलेष्वेवं श्रुतिषु बहुशः प्रयुक्तः, मुख्यफले तन्न्यायातिदेशः श्रीभाष्यकृद्भिः प्रदर्शित इति ज्ञेयम् ।

इति श्रीशैलानन्तपूरुषवंश्यस्य यादवाद्रिनिवासरसिकस्य

अनन्तार्यस्य कृतिषु

तत्क्रतुनयविचारः ।

ಪುಸ್ತಕದ ಸಂಖ್ಯೆ L.t.904....


KARNATAKA SA